## ख

ख, खकारः । स तु व्यञ्जनद्वितीयवर्णः । अस्योच्चारणस्थानं कण्ठः । ( यथा, सिद्धान्तकौमुद्याम् । "अ-कु-ह-विसर्ज्जनीयानां कण्ठः ।" इति । शिक्षाग्रन्थे तु अस्य जिह्वामूलीयत्वमुक्तम् । यथा,—"जिह्वामूले तु कुः प्रोक्तः ।" इति । परं जिह्वामूलीयस्यापि कण्ठमूलोच्चारणपरत्वात् न दोषाय एव ॥ ) यथा, कामधेनुतन्त्रे ।
"खकारं परमाश्चर्य्यं शङ्खकुन्दसमप्रभम् ।
कोणत्रययुतं शून्यं बिन्दुत्रयसमन्वितम् ॥
गुणत्रययुतं देवि ! पञ्चदेवमयं सदा ।
त्रिशक्तिसंयुतं वर्णं खकारं प्रणमाम्यहम् ॥"
तस्योत्पत्तिर्यथा, प्रपञ्चसारे ।
"स सर्गः प्रेषितः कण्ठे वायुना कादिमीरयेत् ।
वर्गस्पर्शनमात्रेण कं खरस्पर्शनात्तु खम् ॥"
( वर्णाभिधाने ) तस्य लेखनप्रकारादिर्यथा,—
"शिवरूपा वामरेखा दक्षरेखा प्रजापतिः ।
अधोरेखा विष्णुरूपा साक्षाद्ब्रह्मस्वरूपिणी ॥
वामादामगता रेखा वह्निरूपा च सा स्मृता ।
मात्रा कुण्डलिनी साक्षात् खकारः पञ्चदैवतः ॥
ध्यानमस्याः प्रवक्ष्यामि शृणुष्व कमलानने ! ।
बन्धूकपुष्पसङ्काशां रत्नालङ्कारभूषिताम् ॥
वराभयकरीं नित्यामीषद्धास्यमुखीं पराम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
तस्य नामानि यथा, नानातन्त्रेषु,—
"खः प्रचण्डः कामरूपी शङ्खिर्वह्निः सरस्वती ।
आकाशमिन्द्रियं दुर्गा चण्डीशस्तापिनी गुरुः ॥
शिखण्डी दन्तजातीशः कपोणिर्गणतो यदि ।
शून्यं कपाली कल्याणी सूर्पकर्णोऽजरामरः ।
शुभाशेया चण्डलिङ्गो जना थङ्गारखड्गकौ ॥"

खं, क्ली, ( खर्व्वति मनोऽस्मिन् खन्यते चुभ्यते मनोऽनेन वा । खर्व्व गतौ, खन दारणे वा अन्येभ्योपीति डः । ) इन्द्रियम् । (यथा, मनौ । २ । ६० ।
"चिराचामेदपः पूर्व्वं द्विः प्रमृज्यात् ततो मुखम् ।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ॥")
पुरम् । क्षेत्रम् । शून्यम् । ( यथा, महाभारते । १ । ८८ । ७ ।
"पतस्यकीर्णाम्बुधराम्बकारात्
खात् खेचराणां प्रवरो यथार्कः ॥")
बिन्दुः । (यथा, लीलावत्यां क्षेत्रव्यवहारे ।
"वेदाग्निबाणखाश्वैश्च खखाभ्राभ्ररसैः क्रमात् ॥")
आकाशम् । ( यथा, मनौ । १२ । १२० ।
"खं सन्निवेशयेत् खेषु चेष्टनस्पर्शनेऽनिलम् ॥"
"खं बाह्याकाशं खेषु उदराद्यवच्छिन्नशरीराकाशेषु ।" इति कुल्लूकभट्टः ॥) संवेदनम् । देवलोकः । शर्म्म । इति मेदिनी । खे । १ ॥ लग्नात् दशमराशिः । इति दीपिका ॥ ( यथा, जातकप्रकरणे । "तनुनिधनखभेशाः केन्द्रकोणे स्थिताश्चे ।" ) अभ्रकम् । इति राजनिर्घण्टः ॥ ( ब्रह्म । तत्त्वात्मम् । यथा, माण्डूकोपनिषदि ।
"एतस्माज्जायते प्राणो मनः सर्व्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथ्वी सर्व्वस्य धारिणी ॥"
चिदानन्दमयब्रह्माकाशम् । यथा, छान्दोग्योपनिषदि "कं ब्रह्म खं ब्रह्म यदेव कं तदेव खं गङ्गाकारो वै पुरुषो धकारो घोषयंस्तथा ॥"
छिद्रम् । यथा, भागवते । ७ । १२ । २५ ।
"खे खानि वायौ निःश्वासांस्तेजस्यूष्माणमात्मवान् ॥")

खः, पुं, (खर्व्वयति खरश्मिभिरिति । खर्व्व+अन्तर्भूतणिच्+डः । ) सूर्य्यः । इति हेमचन्द्रः ॥

खकुन्तलः, पुं, ( खं आकाशं कुन्तलं कुन्तलस्थानीयं यस्य । ) शिवः । इति त्रिकाण्डशेषः ॥ ( विष्णुः । "आकाशं वै विष्णुर्व्योमकेशः शिवो महर्षिः ।" इति श्रुतिः ॥ )

खक्ख, हासे । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सेट् । ) कोमधः । खादिः । खक्खति । इति दुर्गादासः ॥

खक्खटः, पुं, ( खक्ख+अटन् । ) कक्खटः । कठिनः । इत्यमरटीकायां रायमुकुटः ॥

खखोल्कः, पुं, ( खे आकाशे सूर्य्यरूपेण खेषु इन्द्रियेषु आत्मरूपेण उल्का इव । अन्तर्व्बहिःप्रकाशकत्वात् तथात्वम् ।) सूर्य्यः । यथा,—
हरिरुवाच ।
"पुनः सूर्य्यार्च्चनं वक्ष्ये यदुक्तं भृगवे पुरा ।
ओम् खखोल्काय ओम् नमः ॥"
इति गारुडे १६ अध्यायः ॥
खषोल्कायेति च पाठः ॥ ( अयं हि काशीस्थितादित्यः । इति काशीखण्डम् ॥ यदुक्तं तत्रैव ५० अध्याये ।
"खखोल्को नाम भगवानादित्यः परिकीर्त्तितः ॥"
एतद्विवरणं तत्रैवाध्याये विशेषतो द्रष्टव्यम् ॥)

खगः, पुं, ( खे आकाशे गच्छति । ख+गम्+डः ।) सूर्य्यः । ग्रहः । ( यथा, ज्योतिषे ।
"आपोक्लिमे यदि खगाः स किलेन्दुवारः ॥")
देवः । वाणः । पक्षी । इति मेदिनी । गे । ६ ॥ ( यथा, महाभारते । १ । ३३ । १६ ।
"तं व्रजन्तं खगश्रेष्ठं वज्रेणेन्द्रोऽभ्यताड़यत् ॥")
वायुः । इति शब्दचन्द्रिका ॥ (यथा, महाभारते वनपर्व्वणि ।
"तमांसीव यथा सूर्य्यो वृक्षानग्निर्घनान् खगः ॥")
शलभः । इत्यमरटीकायां भरतः ॥ (यथा, मनुः । १२ । ६३ ।
"मांसं गृध्रो वपां मद्गुस्तैलं तैलपकः खगः ॥"
महादेवः । यथा, महाभारते । १३ । १७ । ६६ ।
"आकाशनिर्व्विरूपश्च निपाती ह्यवशः खगः ॥")

खगस्थानं, क्ली, ( खन्यते इति । खन्+कर्म्मणि घञ् । खगानां पक्षिणां खानं वासार्थकोटरम् । ) वृक्षकोटरम् । इति शब्दचन्द्रिका ॥

खगपतिः, पुं. ( खगान् पातीति । खग+पा+ "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः । ) गरुड़ः । इति शब्दरत्नावली ॥

खगवक्त्रः, पुं, ( खगस्य वक्त्रमिव वक्त्रं अग्रभागः आकृतिर्वा यस्य । ) लकुचवृक्षः । इति शब्दचन्द्रिका ॥

खगवती, स्त्री, ( पृथिव्याः स्वकक्षायामाकाशगतिमत्वात् खगतुल्यगतित्वेन साहश्यमस्त्यस्या इति आर्य्यभट्टः । सूर्य्यसिद्धान्तमते तु खगसादृश्यं आकाशस्थितित्वेनास्त्यस्याः । मतुप् । मस्य वः । ) पृथ्वी । इति जटाधरः ॥

खगशत्रुः, पुं, ( खगानां शत्रुरिव । ) पृश्निपर्णी चाकुलिया इति भाषा ॥ इति शब्दचन्द्रिका ॥

खगान्तकः, पुं, ( खगानां अन्तकः यम इव । यद्वा, अन्तयति अन्तं करोति इति । अन्तर्णिच् ततो ण्वुल् । ) श्येनपक्षी । इति राजनिर्घण्टः ॥

खगासनः, पुं, (खगस्य सूर्य्यस्य आसनमिव उदयस्थानं यत्र । आसनत्वेन कल्पितत्वात्तथात्वम् । ) उदयपर्व्वतः । इति शब्दमाला ॥ ( खगो गरुड़ आसनं यस्येति विग्रहे । ) विष्णुः । (एतद्विवरणं यथा, महाभारते ।१। सौपर्णे । ३३ । १२—१८ ।
"तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम् ।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः ॥
उवाच चैनं भूयोऽपि नारायणमिदं वचः ।
अजरश्चामरश्च स्याममृतेन विनाप्यहम् ॥
एवमस्त्विति तं विष्णुरुवाच विनतासुतम् ।
प्रतिगृह्य वरौ तौ च गरुड़ो विष्णुमब्रवीत् ॥
भवतेऽपि वरं दद्यां वृणोतु भगवानपि ।
तं वव्रे वाहनं विष्णुर्गरुत्मन्तं महाबलम् ।
ध्वजञ्च चक्रे भगवानुपरि स्थास्यतीति तम् ॥
एवमस्त्विति तं देवमुक्त्वा नारायणं खगः ।
वव्राज तरसा वेगाद् वायुं स्पर्द्धन् महाजवः ॥")

खगेन्द्रः, पुं, ( खगानां पक्षिणां इन्द्रः । ) गरुड़ः । इति राजनिर्घण्टः ॥ ( यथा, महाभारते । १ । सौपर्णे । ३१ । ३५ ।
"पतत्रीणाञ्च गरुड़ इन्द्रत्वेनाभ्यषिच्यत ॥"
अस्य खगेन्द्रत्वकथा यथा तत्रैव । १६—२० ।
"तच्छ्रुत्वा देवराजस्य कश्यपोऽथ प्रजापतिः ।
वालिखिल्यानुपागम्य कर्म्मसिद्धिमपृच्छत ॥
एवमस्त्विति तच्चापि प्रत्यूचुः सत्यवादिनः ।
तान् कश्यप उवाचेदं सान्त्वपूर्व्वं प्रजापतिः ॥
अयमिन्द्रस्त्रिभुवने नियोगाद् ब्रह्मणः कृतः ।
इन्द्रार्थे च भवन्तोऽपि यत्नवन्तस्तपोधनाः ॥
न मिथ्या ब्रह्मणो वाक्यं कर्त्तुमर्हथ सत्तमाः ! ॥
भवतां हि न मिथ्याऽयं सङ्कल्पो वै चिकीर्षितः ॥
भवत्वेष पतत्रीणामिन्द्रोऽतिबलसत्ववान् ।
प्रसादः क्रियतामस्य देवराजस्य याचतः ॥")

खगेन्द्रध्वजः, पुं, (खगेन्द्रो गरुड़ो ध्वजः केतुर्वाहनं च यस्य ।) विष्णुः । (यथा, भागवते ।१।१८।१६ ।
"ज्ञानेन वैयासकिशब्दितेन
भेजे खगेन्द्रध्वजपादमूलम् ॥" )

खगेश्वरः, पुं, ( खगानां ईश्वरः । ) गरुड़ः । इत्यमरः । १ । १ । ३१ ॥